मृतसंजीवन स्तोत्रं

मृतसंजीवन स्तोत्रं

एवमाराध्य गौरीशं देवं मृत्युंजयेश्वरं |
मृतसंजीवनं नाम्ना कवचं प्रजपेत् सदा || 1 ||

सारात्सारतरं पुण्यं गुह्याद्गुह्यतरं शुभं |
महादेवस्य कवचं मृतसंजीवनामकं || 2 ||

समाहितमना भूत्वा शृणुष्व कवचं शुभं |
शृत्वैतद्दिव्य कवचं रहस्यं कुरु सर्वदा || 3 ||

वराभयकरो यज्वा सर्वदेवनिषेवितः |
मृत्युंजयो महादेवः प्राच्यां मां पातु सर्वदा || 4 ||

दधानः शक्तिमभयां त्रिमुखं षड्भुजः प्रभुः |
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा || 5 ||

अष्टादशभुजोपेतो दंडाभयकरो विभुः |
यमरूपी महादेवो दक्षिणस्यां सदावतु || 6 ||

खड्गाभयकरो धीरो रक्षोगणनिषेवितः |
रक्षोरूपी महेशो मां नैर्ऋत्यां सर्वदावतु || 7 ||

पाशाभयभुजः सर्वरत्नाकरनिषेवितः |
वरुणात्मा महादेवः पश्चिमे मां सदावतु || 8 ||

गदाभयकरः प्राणनायकः सर्वदागतिः |
वायव्यां मारुतात्मा मां शंकरः पातु सर्वदा || 9 ||

शंखाभयकरस्थो मां नायकः परमेश्वरः |
सर्वात्मांतरदिग्भागे पातु मां शंकरः प्रभुः || 10 ||

शूलाभयकरः सर्वविद्यानामधिनायकः |
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः || 11 ||

ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माधः सदावतु |
शिरो मे शंकरः पातु ललाटं चंद्रशेखरः || 12 ||

भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रो लोचनेऽवतु |
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः || 13 ||

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः |
जिह्वां मे दक्षिणामूर्तिर्दंतान्मे गिरिशोऽवतु || 14 ||

मृत्युंजयो मुखं पातु कंठं मे नागभूषणः |
पिनाकि मत्करौ पातु त्रिशूलि हृदयं मम || 15 ||

पंचवक्त्रः स्तनौ पातु उदरं जगदीश्वरः |
नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः || 16 ||

कटद्वयं गिरीशो मे पृष्ठं मे प्रमथाधिपः |
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः || 17 ||

जानुनी मे जगद्धर्ता जंघे मे जगदंबिका |
पादौ मे सततं पातु लोकवंद्यः सदाशिवः || 18 ||

गिरिशः पातु मे भार्यां भवः पातु सुतान्मम |
मृत्युंजयो ममायुष्यं चित्तं मे गणनायकः || 19 ||

सर्वांगं मे सदा पातु कालकालः सदाशिवः |
एतत्ते कवचं पुण्यं देवतानां च दुर्लभं || 20 ||

मृतसंजीवनं नाम्ना महादेवेन कीर्तितं |
सहस्रावर्तनं चास्य पुरश्चरणमीरितं || 21 ||

यः पठेच्छृणुयान्नित्यं श्रावयेत्सु समाहितः |
स कालमृत्युं निर्जित्य सदायुष्यं समश्नुते || 22 ||

हस्तेन वा यदा स्पृष्ट्वा मृतं संजीवयत्यसौ |
आधयोव्याधयस्तस्य न भवंति कदाचन || 23 ||

कालमृत्युमपि प्राप्तमसौ जयति सर्वदा |
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः || 24 ||

युद्धारंभे पठित्वेदमष्टाविंशतिवारकं |
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते || 25 ||

न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वंति तस्य वै |
विजयं लभते देवयुद्धमध्येऽपि सर्वदा || 26 ||

प्रातरुत्थाय सततं यः पठेत्कवचं शुभं |
अक्षय्यं लभते सौख्यमिहलोके परत्र च || 27 ||

सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः |
अजरामरणो भूत्वा सदा षोडशवार्षिकः || 28 ||

विचरत्यखिलान्लोकान्प्राप्य भोगांश्च दुर्लभान् |
तस्मादिदं महागोप्यं कवचं समुदाहृतं || 29 ||

मृतसंजीवनं नाम्ना देवतैरपि दुर्लभं || 30 ||

इति वसिष्ठ कृत मृतसंजीवन कवच स्तोत्रं ||